श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

ओं नमो भगवते वासुदेवाय

महर्षि वेदव्यासप्रणीतं श्रीमद्भागवतमहापुराणम्

# ॥ चतुर्थस्कन्धे चतुर्थोऽध्यायः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

ओं नमो भगवते वासुदेवाय

# श्रीमद्भागवतमहापुराणम्

# ॥ चतुर्थस्कन्धे चतुर्थोऽध्यायः ॥

मैत्रेय उवाच

एतावदुक्त्वा विरराम शङ्करः
    पत्न्यङ्गनाशं ह्युभयत्र चिन्तयन्।
सुहृद्दिदृक्षुः परिशङ्किता भवा -
    न्निष्क्रामती निर्विशती द्विधाऽऽस सा ॥ 1 ॥

सुहृद्दिदृक्षाप्रतिघातदुर्मनाः
    स्नेहाद्रुदत्यश्रुकलातिविह्वला।
भवं भवान्यप्रतिपूरुषं रुषा
    प्रधक्ष्यतीवैक्षत जातवेपथुः ॥ 2 ॥

ततो विनिःश्वस्य सती विहाय तं
    शोकेन रोषेण च दूयता हृदा।
पित्रोरगात्स्त्रैणविमूढधीर्गृहान्
    प्रेम्णाऽऽत्मनो योऽर्धमदात्सतां प्रियः ॥ 3 ॥

तामन्वगच्छन् द्रुतविक्रमां सती -
    मेकां त्रिनेत्रानुचराः सहस्रशः।
सपार्षदयक्षा मणिमन्मदादयः
    पुरोवृषेन्द्रास्तरसा गतव्यथाः ॥ 4 ॥

तां सारिकाकन्दुकदर्पणाम्बुज -
श्वेतातपत्रव्यजनस्रगादिभिः।
गीतायनैर्दुन्दुभिशङ्खवेणुभि -
र्वृषेन्द्रमारोप्य विटङ्किता ययुः ॥ 5 ॥

आब्रह्मघोषोर्जितयज्ञवैशसं
विप्रर्षिजुष्टं विबुधैश्च सर्वशः।
मृद्दार्वयःकाञ्चनदर्भचर्मभि -
र्निसृष्टभाण्डं यजनं समाविशत् ॥ 6 ॥

तामागतां तत्र न कश्चनाद्रियद्
विमानितां यज्ञकृतो भयाज्जनः।
ऋते स्वसॄर्वै जननीं च सादराः
प्रेमाश्रुकण्ठ्यः परिषस्वजुर्मुदा ॥ 7 ॥

सौदर्यसम्प्रश्नसमर्थवार्तया
मात्रा च मातृष्वसृभिश्च सादरम्।
दत्तां सपर्यां वरमासनं च सा
नादत्त पित्राप्रतिनन्दिता सती ॥ 8 ॥

अरुद्रभागं तमवेक्ष्य चाध्वरं
पित्रा च देवे कृतहेलनं विभौ।
अनादृता यज्ञसदस्यधीश्वरी
चुकोप लोकानिव धक्ष्यती रुषा ॥ 9 ॥

जगर्ह सामर्षविपन्नया गिरा
शिवद्विषं धूमपथश्रमस्मयम्।
स्वतेजसा भूतगणान् समुत्थितान्
निगृह्य देवी जगतोऽभिशृण्वतः ॥ 10 ॥

श्रीदेव्युवाच
न यस्य लोकेऽस्त्यतिशायनः प्रिय -
    स्तथाप्रियो देहभृतां प्रियात्मनः।
तस्मिन् समस्तात्मनि मुक्तवैरके
    ऋते भवन्तं कतमः प्रतीपयेत्॥ **11**॥

दोषान् परेषां हि गुणेषु साधवो
    गृह्णन्ति केचिन्न भवादृशा द्विज।
गुणांश्च फल्गून् बहुलीकरिष्णवो
    महत्तमास्तेष्वविदद्भवानघम्॥ **12**॥

नाश्चर्यमेतद्यदसत्सु सर्वदा
    महद्विनिन्दा कुणपात्मवादिषु।
सेर्ष्यं महापूरुषपादपांसुभि -
    र्निरस्ततेजःसु तदेव शोभनम्॥ **13**॥

यद् द्व्यक्षरं नाम गिरेरितं नृणां
    सकृत्प्रसङ्गादघमाशु हन्ति तत्।
पवित्रकीर्तिं तमलङ्घ्यशासनं
    भवानहो द्वेष्टि शिवं शिवेतरः॥ **14**॥

यत्पादपद्मं महतां मनोऽलिभि -
    र्निषेवितं ब्रह्मरसासवार्थिभिः।
लोकस्य यद्वर्षति चाशिषोऽर्थिन -
    स्तस्मै भवान् द्रुह्यति विश्वबन्धवे॥ **15**॥

किं वा शिवाख्यमशिवं न विदुस्त्वदन्ये
    ब्रह्मादयस्तमवकीर्य जटाः श्मशाने।

तन्माल्यभस्मनृकपाल्यवसत्पिशाचै -
　　र्ये मूर्धभिर्दधति तच्चरणावसृष्टम्॥ **16**॥

कर्णौ पिधाय निरयाद्यदकल्प ईशे
　　धर्मावितर्यसृणिभिर्नृभिरस्यमाने।
छिन्द्यात्प्रसह्य रुशतीमसतीं प्रभुश्चे -
　　ज्जिह्वामसूनपि ततो विसृजेत्स धर्मः॥ **17**॥

अतस्तवोत्पन्नमिदं कलेवरं
　　न धारयिष्ये शितिकण्ठगर्हिणः।
जग्धस्य मोहाद्धि विशुद्धिमन्धसो
　　जुगुप्सितस्योद्धरणं प्रचक्षते॥ **18**॥

न वेदवादाननुवर्तते मतिः
　　स्व एव लोके रमतो महामुनेः।
यथा गतिर्देवमनुष्ययोः पृथक्
　　स्व एव धर्मे न परं क्षिपेत्स्थितः॥ **19**॥

कर्म प्रवृत्तं च निवृत्तमप्यृतं
　　वेदे विविच्योभयलिङ्गमाश्रितम्।
विरोधि तद्यौगपदैककर्तरि
　　द्वयं तथा ब्रह्मणि कर्म नर्च्छति॥ **20**॥

मा वः पदव्यः पितरस्मदास्थिता
　　या यज्ञशालासु न धूमवर्त्मभिः।
तदन्नतृप्तैरसुभृद्भिरीडिता
　　अव्यक्तलिङ्गा अवधूतसेविताः॥ **21**॥

नैतेन देहेन हरे कृतागसो
　　देहोद्भवेनालमलं कुजन्मना।

व्रीडा ममाभूत्कुजनप्रसङ्गत -
स्तज्जन्म धिग् यो महतामवद्यकृत् ॥ **22** ॥

गोत्रं त्वदीयं भगवान् वृषध्वजो
दाक्षायणीत्याह यदा सुदुर्मनाः।
व्यपेतनर्मस्मितमाशु तद्ध्यहं
व्युत्स्रक्ष्य एतत्कुणपं त्वदङ्गजम् ॥ **23** ॥

मैत्रेय उवाच
इत्यध्वरे दक्षमनूद्य शत्रुहन्
क्षितावुदीचीं निषसाद शान्तवाक्।
स्पृष्ट्वा जलं पीतदुकूलसंवृता
निमील्य दृग्योगपथं समाविशत् ॥ **24** ॥

कृत्वा समानावनिलौ जितासना
सोदानमुत्थाप्य च नाभिचक्रतः।
शनैर्हृदि स्थाप्य धियोरसि स्थितं
कण्ठाद् भ्रुवोर्मध्यमनिन्दितानयत् ॥ **25** ॥

एवं स्वदेहं महतां महीयसा
मुहुः समारोपितमङ्कमादरात्।
जिहासती दक्षरुषा मनस्विनी
दधार गात्रेष्वनिलाग्निधारणाम् ॥ **26** ॥

ततः स्वभर्तुश्चरणाम्बुजासवं
जगद्गुरोश्चिन्तयती न चापरम्।
ददर्श देहो हतकल्मषा सती
सद्यः प्रजज्वाल समाधिजाग्निना ॥ **27** ॥

तत्पश्यतां खे भुवि चाद्भुतं महद्
    हाहेति वादः सुमहानजायत।
हन्त प्रिया दैवतमस्य देवी
    जहावसून् केन सती प्रकोपिता॥ **28** ॥

अहो अनात्म्यं महदस्य पश्यत
    प्रजापतेर्यस्य चराचरं प्रजाः।
जहावसून् यद्विमताऽऽत्मजा सती
    मनस्विनी मानमभीक्ष्णमर्हति॥ **29** ॥

सोऽयं दुर्मर्षहृदयो ब्रह्मध्रुक् च
    लोकेऽपकीर्तिं महतीमवाप्स्यति।
यदङ्गजां स्वां पुरुषद्विडुद्यतां
    न प्रत्यषेधन्मृतयेऽपराधतः॥ **30** ॥

वदत्येवं जने सत्या दृष्ट्वासुत्यागमद्भुतम्।
दक्षं तत्पार्षदा हन्तुमुदतिष्ठन्नुदायुधाः॥ **31** ॥

तेषामापततां वेगं निशाम्य भगवान् भृगुः।
यज्ञघ्नघ्नेन यजुषा दक्षिणाग्नौ जुहाव ह॥ **32** ॥

अध्वर्युणा हूयमाने देवा उत्पेतुरोजसा।
ऋभवो नाम तपसा सोमं प्राप्ताः सहस्रशः॥ **33** ॥

तैरलातायुधैः सर्वे प्रमथाः सहगुह्यकाः।
हन्यमाना दिशो भेजुरुशद्भिर्ब्रह्मतेजसा॥ **34** ॥

॥ इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां
चतुर्थस्कन्धे सतीदेहोत्सर्गो नाम चतुर्थोऽध्यायः॥